# ।। श्री ऋणमोचन महागणपति स्तोत्रम् ।।

## संशोधित - श्री पीताम्बरा सिद्धपीठाचार्य "स्वामी रूपेश्वरानंद जी महाराज" द्वारा




### विनियोग :

श्रीऋणमोचनमहागणपतिस्तोत्रस्य शुक्राचार्य ऋषिः,
अनुष्टुप्छन्दः श्रीऋणमोचक महागणपतिः देवता
मम परिवारस्य दारिद्रयनिवारणार्थे ऋण मुक्ति हेतवे च
श्री महागणपति देवता कृपाप्रसादसिद्धयर्थे च पाठे विनियोगः ।।

### ध्यानम् :

रक्ताङ्गं रक्तवस्त्रं सितकुसुमगणैः पूजितं रक्तगन्धैः,
क्षीराब्धौ रत्न पीठे सुरतरुविमले रत्नसिंहासनस्थम् ।
दोर्भिः पाशाङ्कुशेष्टाभयधरमतुलं चन्द्रमौलिं त्रिणेत्रं,
ध्यायेत् शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ।।

### :: स्तोत्र पाठ आरम्भ ::

स्मरामि देव देवेशं वक्रतुण्डं महाबलम् ।
षडक्षरं कृपासिंधु नमामि ऋणमुक्तये ।।1।।

एकाक्षरं ह्येकदन्तम् एक ब्रह्म सनातनम् ।
एकमेवाद्वितीयं च नमामि ऋणमुक्तये ।।2।।

महागणपतिं देवं महासत्वं महाबलम् ।
महाविघ्नहरं शम्भोः नमामि ऋणमुक्तये ।।3।।

कृष्णाम्बरं कृष्णवर्णं कृष्णगन्धानुलेपनम् ।
कृष्णसर्पोपवीतं च नमामि ऋणमुक्तये ।।4।।

रक्ताम्बरं रक्तवर्णं रक्तगन्धानुलेपनम् ।
रक्तपुष्पप्रियं देवं नमामि ऋणमुक्तये ।।5।।

पीताम्बरं पीतवर्णं पीतगन्धानुलेपनम् ।
पीतपुष्पप्रियं देवं नमामि ऋणमुक्तये ।।6।।

धूम्राम्बरं धूम्रवर्णं धूम्रगन्धानुलेपनम् ।
होम धूमप्रियं देवं नमामि ऋणमुक्तये ।।7।।

फालनेत्रं फालचन्द्रं पाशाङ्कुशधरं विभुम् ।
चामरालङ्कृतं देवं नमामि ऋणमुक्तये ।।8।।

### फलश्रुति :

इदं त्वृणहरं स्तोत्रं सन्ध्यायां यः पठेन्नरः । षण्मासाभ्यन्तरेणैव ऋणमुक्तो भविष्यति ।।1।।
इति श्रीऋणमोचनमहागणपतिस्तोत्रं सम्पूर्णम् ।

### :: सिद्धि विधान ::

- सिद्ध मुहूर्त में 1100 पाठ कर सिद्ध करें ।
- सिद्ध करने पर ऋण मुक्ति हेतु प्रतिदिन 40 पाठ 30 दिन तक करें अथवा नित्य 11 पाठ छः माह तक करें ।
- भोग में लड्डू रखे । पाठ के बाद बच्चों मे लड्डू खिला दें ।
- दुकान में आय हेतु 11 पाठ से जल अभिमंत्रित कर दूकान में छिड़कें ।



मार्गदर्शन एवं पावन सान्निध्य
जगद्गुरू श्री पीताम्बरा सिद्धपीठाचार्य
**श्री श्री 1008 श्रद्धेय स्वामी रूपेश्वरानन्द जी महाराज**
**स्वामी रूपेश्वरानन्द आश्रम** वाराणसी (उत्तरप्रदेश)

Swami Rupeshwaranand
UPI ID: swamiji1997-3@okaxis


www.swamirupeshwaranand.in | swamirupeshwaranand | 76072 33230